# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, एप्रिल-२०१६

**कक्षा - शास्त्री-३ ( Sem_6 )** **प्रश्नपत्र-६** **गुणाः - ७०**

**विषयः - वेदसंहिता** CC 3.6.12 **समयः - ११:०० तः ०२:००**

**दिनाङ्कः - २३-०४-२०१६** **सन्दर्भग्रन्थः - वेदभाष्यभूमिकासंग्रहः**

---

**युनिट-१**

**प्रश्नः -१ निम्नाङ्कितेषु कयोश्चित् द्वयोः ससन्दर्भं व्याख्या विधेया ।** ०८

*(१) ऋषयोऽपि पदार्थानां नान्तं यान्ति पृथक्तः ।*
*लक्षणेन तु सिद्धानामन्तं यान्ति विपश्चितः ॥*

*(२) सामोक्ति बृहदायुक्तो गीतायामृचि केवले ।*
*गाने वा गान एवेति स्मार्य ते सप्तमोदितम् ॥*

*(३) इरा गिरा विकल्पः स्यादुत्तरैषा विशेषतः ।*
*आद्यो मैवं बाधपूर्वमिराया विहितत्वतः ॥*

**प्रश्नः -२ कस्यापि एकस्य वर्णनं वर्णयत ।** ०८

*(१) शरलेशविषयको विचारवर्णनम् ।* *(२) सामवेदिनां साम्नवानुष्ठानकर्तव्यतानिरूपणम् ।*

**प्रश्नः -३ द्वयोः टिप्पणी कार्या ।** ०४

*(१) ब्राह्मणग्रन्थस्य लक्षणम् ।* *(२) रथन्तरशब्दनिरूपणम् ।*

*(३) साम्नामृचः प्रति संस्कारत्वव्यवस्था ।* *(४) सामवेदभाष्यग्रन्थमहत्त्वम् ।*

**प्रश्नः -४ अधोलिखितेषु पञ्चानामुत्तरं लिखत ।** ०५

*(१) ग्रन्थस्य भाष्याचार्यः कः अस्ति ?*

*(२) आपस्तम्बस्य मतेन का उक्तिः विख्याता ?*

*(३) "अहेबुह्नियमन्त्रं मे गोपाय" कस्य ब्राह्मणस्योक्तिः ?*

*(४) 'इरागिरा . . . . . स्याद्' इत्यस्य रिक्त स्थानं पूरयतु ।*

*(५) 'रथन्तरे . . . . . ग्राह्या' इत्यस्य रिक्तस्थानं पूरयतु ॥*

*(६) 'उच्चैगेयं बलवद्गेयमिति . . . . धर्मः' स्थानपुर्ति कुरु ।*

*(७) शैरवकस्य नाम ग्रन्थानुसारं लिखतु ।*

**युनिट-२**

**प्रश्नः -५ कयोश्चिद् द्वयोः ससन्दर्भं व्याख्या कार्या ।** ०८

*(१) प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः ।*
*अप्राप्ते तु विधीयेरन् बहवोऽप्येक यत्नतः ॥*

*(२) उक्त्वाग्निष्टुतमेतस्य वारवन्तीय साम हि ।*
*रवेतीष्वृक्षुकृत्वेति श्रृतं पशुफलाप्तये ॥*

*(३) स्तोमवृद्धौ किमागन्तो मर्ध्येऽन्तेऽवाऽस्तुमध्यतः ।*
*द्वादशाहवदन्यत्र मध्यानुक्तेर्न मध्यतः ॥*

**प्रश्नः -६ एकस्य समीक्षा कार्या ।** ०८

*(१) अन्यशब्दस्य सर्वविषयत्वकथनम् ।*

*(२) पर्यग्निकरणे ब्रह्मसाम्न-उत्कर्षविधानम् ।*

**प्रश्नः -७ कश्चिदेका टिप्पणी कार्या ।** ०२

*(१) चित्राशब्दस्य नामधेयत्वनिर्णयः ।*

*(२) कण्वरथन्तरं स्वयोनावेव इति निर्धारणम् ।*

**प्रश्नः -८ द्वयोः लघूत्तरौ देयौ ।** ०२

*(१) त्रिवृत्तोविष्टुनिरिति ।* *(२) पृष्ठानि कति ?*

*(३) आज्यानि कति ?*

## युनिट-३

**प्रश्नः -९ द्वयोः मन्त्रयोः ससन्दर्भ व्याख्या विधेया ।** ०८

*(१) यस्तत्राथवर्णान् मन्त्रान् जपेच्छ्द्धासमन्वितः ।*
*तेषां अर्थोदभवं कृत्स्नं फलं प्राप्नोति स ध्रुवम् ॥*

*(२) सिदधसाध्यस्वभावाभ्यां धात्वार्थोद्विविधो मतः ।*
*अन्योन्पादानुकूलात्मा भावनासाध्यरूपिणी ॥*

*(३) विनापिविधिनादृष्ट लाभान्न हि तदर्थता ।*
*कल्प्यस्तु विधि सामर्थ्यात् स्वर्गोविश्वजिदादि वत् ॥*

**प्रश्नः -१० एकस्य वर्णन कुरुत ।** ०८

*(१) अथर्ववेदोपवेदनिरूपणं पुराणादिषु तत्प्रशंसा वचनं च वर्णयत ।*

*(२) इष्टप्रयोजनोऽर्थावबोध एवाध्यायन विधेर्भाव्यः इति उत्तरपक्षस्य वर्णनं वर्णयत ।*

**प्रश्नः -११ द्वयोः टिप्पणी कार्या ।** ०४

*(१) प्रामाण्यस्वतोऽप्रामाण्यं च परतः इति मीमांसकमूर्धन्यानां सिद्धान्तनिर्णयः ।*

*(२) ''अपौरुषेया वेदाः'' मीमांसकानाम् उत्तरपक्षः ।*

*(३) ''तस्मान्नित्यः शब्दः'' शाब्दिकानां मतं लिखतु ।*

**प्रश्नः -१२ पञ्चानां लघूत्ताणि लिखन्तु ।** ०५

*(१) 'पदाग्नेयोऽष्टाकपालः'- कस्याः संहितायाः सूत्रम् ?*

*(२) 'स्वाध्यायोऽध्येतव्यः' कस्य ब्राह्मणस्योक्तिः ?*

*(३) ब्रह्मवेदः कः ?*

*(४) 'सर्वसिद्धिर्भविष्यति' इति वाक्यं कदा सार्थको भवति ?*

*(५) 'गीतिषु सामाख्या' कस्य मतम् ?*

*(६) 'उपनीय गुरुः . . . . . पूर्वकम्' । पूर्ति कार्या ।*

*(७) ''समानकर्तृकयोः पूर्व काले'' इति सूत्रं कस्याचार्यस्य अस्ति ?*

---------------------